**दिनाङ्क:-04.10.2023**

**प्रात: - 06:55**

**प्रधानमन्त्री-तेलंगाना**

प्रधानमन्त्री नेन्द्रमोदी ह्य: सायं तेलंगानाया: निजामाबादस्थले अष्टसहस्र-कोट्यधिकानां रूप्यकाणां विकास परियोजनानां आधारशिलां स्थापितवान् सहैव राष्ट्रय समर्पितवान्। प्रधानमन्त्रिणा अत्रावसरे मनोहराबाद-सिद्दीपेटस्थलं संयोजयितुं नवीना-रेलपट्टिका: अथ धर्माबाद-मनोहराबादायो: महबूबनगर-कुरनूलयो: च मध्ये वैद्यतीय-परियेजना: समेत्य अनेका: रेल-परियोजना: राष्ट्राय समर्पिता:। असौ पेट्टापल्ली-जनपदे राष्ट्रिय-ताप-विद्युत-निगमस्य तेलंगाना-ताप-विद्युत्-परियोजनाया: प्रथमचरणस्य प्रथमं अष्टशतं मेगावॉट परिमितं प्रभागं राष्ट्राय समर्पितवान्। विद्युत्-संयंत्रेण उत्पादितस्य अशीतिप्रतिशत-विद्युतस्य प्रयोग: राज्ये एव करिष्यते। अनेन प्रयोगेण उत्तर-दक्षिणीय-सम्पर्क-सौविध्येषु संशोधनं भविष्यति। अवसरे अस्मिन् प्रधानमन्त्रिणा विंशति-जनपद-मुख्यालयेषु प्रधानमन्त्री-आयुष्मान्-भारत स्वास्थ्य-अवसंरचना-अभियानस्य अन्तर्गतं पञ्चाशत्-शयनासन-युतस्य गभीरोपचार-प्रभागस्यापि आधारशिलां संस्थापितवान्। इत: पूर्वं प्रधानमन्त्रिणा छत्तीसगढ़स्य आदिवासि-बस्तर-संभागस्य मुख्यालये जगदपुरे सप्तविंशति-सहस्र-कोटि-रुप्याकाणां विकासपरियोजना: राष्ट्राय अर्पिता:। प्रधानमन्त्री प्रावोचत् यत् विकसितभारतस्य स्वप्न: तदा पूर्णो भविष्यति यदा प्रत्येकराज्यस्य जनपदस्य ग्रामस्य च विकासो भविष्यति।

-

**गृहमन्त्री-NLFT ATTF**

केन्द्रप्रशासनेन नेशनल-लिबरेशन-फ्रन्ट-ऑफ-त्रिपुरां, ऑल-त्रिपुरा-टाइगरफोर्स इत्येतं समेत्य तेषां समूहान् विधिकेतर-गतिविधि-अधिनियमस्यान्तर्गतं विधिकेतर-संघ: उद्घोषित:। गृह-मन्त्रालयेन एतेषु संघटनेषु पञ्चवर्षाणि यातव् प्रतिबन्ध: प्रख्यापित:। गृहमन्त्रालयेन ह्य: एका अधिसूचना प्रख्यापिता प्रोक्तं च यत् प्रशासनस्य विचारो वर्तते यत् एतानि विधिकेतर-संघटनानि भारतस्य संप्रभुतायै अखण्डतायै च हानिप्रदानि सन्ति। एतानि संघटानानि विध्वसंक-हिंसक-गतिविधिषु संलग्नानि अथ च स्वीयोद्देश्यं प्राप्तुं जनानां मध्ये आतकवांदं प्रसारयन्ति। एतदर्थं प्रतिबन्ध: आवश्यको वर्तते।

**हैदराबाद निर्वाचनायोग:**

निर्वाचनायोगेन ह्य: तेलंगाना-विधानसभा-निर्वाचनस्य सज्जतायै विभिन्नै: राजनैतिक-दलै: उपवेशनं विहितम्। मुख्य-निर्वाचनायुक्तस्य राजीव-कुमारस्य नेतृत्वे दलायोगेन राजनैतिक-दलानां विषयेषु विचार: कृत:। एतेषु राजनीतिक-दलेषु भारतीय जनता पार्टी-कांग्रेस-भारत राष्ट्र समिति-आम-आदमी पार्टी-मार्क्सवादी कम्युनिस्ट-पार्टी-बहुजन-समाजपार्टी इत्यादिनि दलानि सम्मिलितानि अभवन्। षड्-राष्ट्रिय-दलानां चत्वारि-क्षेत्रीय-दलानां च प्रतिनिधिमण्डलै: पृथक्तया निर्वाचनायोगेन सह मेलनं कृतम्। निर्वाचनायोग: अद्य आरक्षि-अधीक्षकै: जनपदाधिकारिभि: समं मेलनं करिष्यति।

**ऋतु-विज्ञान-विभाग:**

ऋतुविज्ञान-विभागेन आगामिषु त्रि-दिवसेषु बिहार-झारखण्ड-पश्चिमबंग-सिक्किम-उत्तरी-ओडिशा-जनपदेषु अतिवृष्टे: अनुमानं प्रख्यापितम्। ऋतु-विभागेन संसूचितं यत् देशस्य पूर्वोत्तरीयभागेषु चत्वारि-दिनं यावत् अतिवृष्टि: भविष्यति। सोनभद्र-जनपदे सर्वाधिका षोडश-सेंटीमीटर-मिता वृष्टि: समाकलिता। तिरुवनन्तपुर-जनपदे नारंग-वार्णिकी संचेतना कोल्लम-पत्तनंथिट्टा-अलाप्पुझा-जनपदेषु पीतवार्णिकी संचेतना प्रसारिता। लक्षद्वीप-केरल-तटयो: मत्स्य अधिग्रहण प्रतिबन्ध: अपि प्रख्यापित: सहैव राज्यापदाप्राधिकरणेन मत्सपालकेभ्य: तटस्थ-जनेभ्य: च संचेतना प्रदत्ता।

**एशियाई-क्रीडा**

चीनस्य हांग्चोउ-नगरे एशियाई-क्रीडाया: दशमे दिवसे भारतेन द्वेस्वर्ण पदकं द्वे रजतपदकं-पञ्च-कांस्य-पदकानि च आहत्य नवषष्टि: पदकानि ह्य: अधिगृहितानि। एतेषु पदकेषु पञ्चदशस्वर्ण पदकानि- षड्विंशति-रजतपदकानि अष्टाविंशति च कांस्यपदकानि-सम्मिलितानि सन्ति। भारतदेश: सम्पूर्णतालिकायां चतुर्थं स्थानं भजते।

**।। इति वार्ता: ।।**